खरिणौ। लाजति। इ, लाज्यते। भर्त्सन एव केचित् पठन्ति। भर्गो भर्ज्जनम्। इति दुर्गादासः॥

लाजं, क्ली, ( लाज्+अच्।) उशीरम्। इति मेदिनी। जे, १५॥ ( भृष्टधान्यम्। खइ इति भाषा॥

"येषां स्युस्तण्डुलास्तानि धान्यानि सतु-
षाणि च।
भृष्टानि स्फुटितान्याहुर्लाजानीति मनीषिणः॥
लाजाः स्युर्म्मधुराः शीता लघवो दीपनाश्च ते॥
स्वल्पमूत्रमला रूक्षा बल्याः पित्तकफच्छिदः।
छर्द्यतीसारदाहास्रमेहमेदस्तृषापहाः॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे॥)

लाजः, पुं, ( लाज्+अच्।) आर्द्रतण्डुलः। इति मेदिनी। जे, १५॥

लाजा, स्त्री, अक्षतम्। इति मेदिनी। जे, १५॥ ( यथा, सुश्रुते। ४। १६।

"पैत्तिकं शर्कराला जामधुकैः सारिवा-
युतैः॥")

लाजाः, पुं भूम्नि, ( लाज्यन्ते ये ते। लाज्+घञ्।) भृष्टधान्यम्। लाओया इति खइ इति च भाषा। ( यथा, रामायणे। २। ४३। १३।

"कदा प्राणिसहस्राणि राजमार्गे ममात्मजौ।
लाजैरवकरिष्यन्ति प्रविशन्तावरिन्दमौ॥")

तत्पर्य्यायः। अक्षतम् २। इत्यमरः। २। ९। ४७॥ लाजा ३ अक्षताः ४। इति भरतः॥ अस्य गुणाः। तृष्णाच्छर्द्यतीसारप्रमेहमेदःकफनाशित्वम्। कासपित्तोपशमनत्वम्। अग्निकारित्वम्। लघुत्वम्। शीतलत्वञ्च। अस्य मण्डगुणाः। अग्निकारित्वम्। दाहतृष्णाज्वरातीसारनाशित्वम्। अशेषदोषामपाचनत्वञ्च॥ तस्य पेयागुणाः। श्रामकण्ठस्य श्रमघ्नत्वम्। क्षुधातृष्णाग्लानिदौर्ब्बल्यकुक्षिरोगनाशित्वञ्च। इति राजवल्लभः॥ * ॥ अपि च।

"एते च व्रीहयो भृष्टास्ते लाजा इति
संज्ञिताः।
यवादयश्च ये भृष्टास्ते धानाः परिकीर्त्तिताः॥
लाजाश्च यवधानाश्च तर्पणाः पित्तनाशनाः।
गोधूमयावनालोत्थाः किञ्चिदुष्णाश्च दीपनाः॥
तृष्णातीसारशमनो धातुसाम्यकरः परः।
मन्दाग्निविषमाग्नीनां बालस्थविरयोषिताम्।
देयश्च सुकुमाराणां लाजमण्डः सुसंस्कृतः॥"
इति राजनिर्घण्टः॥ * ॥

तस्य चूर्णगुणाः।

"द्राक्षादाड़िमखर्ज्जूरम्बदिताम्बुशर्करम्।
लाजचूर्णं समध्वाज्यं सन्तर्पणमुदाहृतम्॥"

लाजचूर्णं द्राक्षादिजलशर्करामध्वाज्यसहितं तर्पणसक्तमित्यर्थः। लाजशक्तुगुणाश्च गुणग्रन्थे।

"लाजानां शक्तवः चौद्रसितायुक्ता विशेषतः।
छर्द्यतीसारतृड्दाहविषमूर्च्छाज्वरापहाः॥"
चरकश्च।
"यत्र तर्पणमेवादौ प्रदेयं लाजशक्तुभिः।
ज्वरापहैः फलरसैर्युक्तं समधुशर्करम्॥"
इति भावप्रकाशः॥

लाञ्छनं क्ली, ( लाञ्छ+ल्युट्।) नाम। चिह्नम्। इति मेदिनी। ने, १२१॥ ( यथा, कुमारे। ७। ३५।

"दिवापि निष्ठ्यूतमरीचिभासा
बाल्यादनाविष्कृतलाञ्छनेन।
चन्द्रेण नित्यं प्रतिभिन्नमौलेः
चूड़ामणेः किं ग्रहणं हरस्य॥")

लाञ्छनः, पुं, ( लाञ्छतीति। लाञ्छ+ल्युः।) रागीधान्यम्। इति राजनिर्घण्टः॥ क्वचित् पुस्तके लाञ्छनीति च पाठः॥

लाटः, पुं, देशान्तरम्। (यथा, कथासरित्सागरे। ७८। ११९।

"ददौ तस्मै सपुत्राय प्रीत्या वीरवराय च।
लाटदेशे ततो राज्यं स कर्णाटपुरे नृपः॥")

वस्त्रम्। इति मेदिनी। टे, २७॥ जीर्णभूषणादि। इति शब्दरत्नावली॥

लाड, तृ क चेपे। इति कविकल्पद्रुमः॥ ( अदन्तचुरा० पर०-सक०-सेट्।) लाडयति अललाडत्। इति दुर्गादासः॥

लापः, पुं, कथनम्। लपधातोर्भावे घञ्प्रत्ययेन निष्पन्नम्॥

लाप्यं, त्रि, ( लप्यते इति। लप्+ण्यत्।) कथनीयम्। लपधातोः कर्म्मणि घ्यण्प्रत्ययेन निष्पन्नम्। इति मुग्धबोधव्याकरणम्॥

लाभः, पुं, ( लभ+घञ् करणे।) मूलधनादधिकं वाणिज्योपार्ज्जितं धनम्। तत्पर्य्यायः। फलम् २। इत्यमरभरतौ॥ लभ्यम् ३ वृद्धिः ४। इति शब्दरत्नावली॥ ( यथा, रामायणे: २। २२। २२।

"सुखदुःखे भयक्रोधौ लाभालाभौ भवाभवौ।
यच्च किञ्चित्तथाभूतं ननु दैवस्य कर्म्म तत्॥")

प्राप्तिः। इति लभधात्वर्थदर्शनात्॥ ( सप्तधर्म्म्यवित्तागमेषु अन्यतमः। यथा, मनुः। १०। ११५।

"सप्त वित्तागमा धर्म्म्या दायो लाभः क्रयो जयः।
प्रयोगः कर्म्मयोगश्च सत्प्रतिग्रह एव च॥")

लाभ्यं, क्ली, ( लभ्+ण्यत्।) लाभः। इति शब्दरत्नावली॥

लामज्जकं, क्ली, वीरणमूलम्। इत्यमरः॥ अस्य पर्य्यायगुणाद्युशीरशब्दे द्रष्टव्यौ। उशीरवत् पीतवर्णविटपविशेषः। तत्पर्य्यायः। सुनालम् २ अमृणालम् ३ लवम् ४ लघु ५ इष्टिकापथिकम् ६ शीघ्रम् ७ दीर्घमूलम् ८ जलाशयम् ९। अस्य गुणाः। हिमत्वम्। तिक्तत्वम्। वातपित्ततृड्दाहश्रममूर्च्छार्त्तिरक्तज्वरापहत्वञ्च। इति राजनिर्घण्टः॥

लालनं, क्ली, ( लल्+णिच्+ल्युट्।) अत्यन्तस्नेहकरणम्। प्रेमपूर्ब्बकबालकादरणम्। सोधाग इति भाषा। लड कोपसेवे उपसेव इह अत्यन्तपालनम्। क, लालयेत् पञ्च वर्षाणि पुत्रमिति अत्र डलयोरेकत्वाल्लत्वम्। इति कविकल्पद्रुमटीकायां दुर्गादासः॥ तथा हि।

"लालने बहवो दोषास्ताड़ने बहवो गुणाः।
तस्मात् पुत्रञ्च शिष्यञ्च ताड़येन्न तु लालयेत्॥"
अपि च।
"लालयेत् पञ्च वर्षाणि दशवर्षाणि ताड़येत्।
प्राप्ते तु षोड़शे वर्षे पुत्रं मित्रवदाचरेत्॥"
इति चाणक्यशतकम्॥

लालसा, पुं स्त्री, ( लस्+यङ्। ततः "अ प्रत्ययात्।" ३। ३। १०२। इति अः। टाप्।) महाभिलाषः। इत्यमरः॥ औत्सुक्यम्। याच्ञा इति मेदिनी। से, ३४॥ दोहदम्। यथा,—

"दोहदं दौर्हृदं श्रद्धा लालसा स्रतिमासि तु।"
इति हेमचन्द्रः॥

लोलः। इति नानार्थे स एव॥ ( लोलुपे, त्रि। इति यादवः॥ यथा, माघे। ४। ६।

"छायां निजस्त्री चटुलालसानां
मदेन किञ्चित् चटुलालसानाम्।
कुर्व्वाणमुत्पिञ्जरजातपत्रै-
र्विहङ्गमानां जलजातपत्रैः॥"

तथा च कुमारे। ७। ५६।

"तस्मिन् मुहूर्त्ते पुरसुन्दरीणा-
मीशानसन्दर्शनलालसानाम्॥")

लालसीकं, क्ली, पिच्छलम्। इति शब्दरत्नावली॥

लाला, स्त्री, ( लल्+णिच्+अच्। टाप्।) मुखभवजलम्। लाल इति भाषा। तत्पर्य्यायः। सृणिका २ स्यन्दिनी ३। इत्यमरः॥ दाविका ४ सृणीका ५। इति शब्दरत्नावली॥ मुखस्रावः। इति राजनिर्घण्टः॥ ( यथा, सुश्रुते। ४। २२।

"हीनच्छेदात् भवेच्छोफो लालानिद्राभ्रम-
क्लमः॥")

लालाटिकः, त्रि, ( ललाटं पश्यतीति। ललाट+ "संज्ञायां ललाटकुक्कुटौ पश्यति।" ४। ४। ४६। इति ठक्। दूरेस्थित्वा प्रभोर्ललाटं पश्यति न तु कार्य्योपस्थितस्तिष्ठतीत्यर्थः।) प्रभोर्भालदर्शी। कार्य्याक्षमः। इत्यमरः॥ यः सेवकः क्रोधप्रसादचिह्नज्ञानाय प्रभोर्ललाटमेव पश्यति। यश्च प्रभोः कार्य्येऽक्षमोऽशक्तस्तौ लालाटिकौ पूर्ब्बवत् ठकः। केचित्तु कार्य्याक्षम इति भावदर्शिन एव विशेषणमुक्त्वा एकमेव लालाटिकमाहुर्न तु द्वाविति। भावदर्शीति च पाठः लालाटिकः सदालस्ये प्रभुभावनिदर्शिनि। इत्यजयः॥ इति तट्टीकायां भरतः॥ आभरणविशेषे, पुं। इति मेदिनी। के, २२१॥ ललाटसम्बन्धिनि, त्रि। यथा। शाम्भस्तु लालाटिकीत्यादि॥

लालामेहः, पुं, ( लालावत् मेहतीति। मिह+अच्।) प्रमेहविशेषः। यथा,—

"लालातन्तुयुतं मूत्रं लालामेहेन पिच्छिलम्।"
प्रमेहतीति शेषः। अस्यौषधम्।
"गुडूच्याः स्वरसः पेयो मधुना सर्व्वमेहजित्।